चन्द्रोपरागसमये सूर्य्ये दशगुणं ततः ॥
पुण्येऽप्यर्द्धोदये काले ततः शतगुणं फलम् ।
सर्व्वेषामेव सङ्कल्पं वैष्णवानां विपर्य्ययः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

जि, जये । अभिभवे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सकं च-अनिट् ।) जय उत्कर्षः स्वीकारश्च । उत्कर्षेऽकर्म्मकः । जयन्ति यमुनाकुञ्जे रहःकेलयः । सखेरसङ्कोरजयत् सुरालयमिति कादम्बरी । जयति शत्रुं बली । अनभिधानादस्मात् तुवन्धोः प्रयोगाभावः । किन्तु तयोः स्थाने तिवन्तौति । किन्तु तुपः स्थाने तातङ् इष्यते । यथा, भावगम्यलयः कोऽपि जयताद्वाङ्गगोचरः । इति दुर्गादासः ॥

जिः, त्रि, ( जयतीति । जि + बाहुलकात् डिः । ) जेता । पिशाचे, पुं । इत्येकाक्षरकोषः ॥

जिगत्नुः, पुं, (गच्छतीति । गम + "गमेः सन्वच ।" उणां ३ । ३१ । इति क्नुः सन्वत्कार्य्यञ्च । अनुदात्तोपदेशे इत्यादिना मलोपः । ) प्राणवायुः । इत्युणादिकोषः ॥

जिगमिषा, स्त्री, ( गन्तुमिच्छा । गम + सन् + अ । ततष्टाप् । ) गमनेच्छा । इति व्याकरणम् ॥

जिगीषा, स्त्री, ( जेतुमिच्छा । जि + सन् + अ । ततष्टाप् । ) जयेच्छा । ( यथा, महाभारते १ । ७६ । ६ ।
"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ॥")
व्यवसायः । प्रकर्षः । इति मेदिनी । षे, ३६ ॥

जिघत्सा, स्त्री, ( अत्तुमिच्छा । अद् भक्षणे + सन् + अः । "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लृ ।) क्षुधा । इति हेमचन्द्रः ।३।५७॥

जिघत्सुः, त्रि, ( अत्तुमिच्छुः । अद् + सन् + "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लादेशः । ततः "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः । ) क्षुधितः । इत्यमरः । ३ । १ । २० ॥

जिघांसकः, त्रि, (जिघांसति हन्तुमिच्छतीति । हन + सन् + ण्वुल् ।) हननेच्छुकः । इति व्याकरणम् ॥

जिघांसा, स्त्री, ( हन्तुमिच्छा । हन् + सन् + "अभ्यासाच्च ।" ७ । ३ । ५५ । इति कुत्वम् । "अज्झनगमां सनि ।" ६ । ४ । १६ । इति दीर्घः । ततः अप्रत्ययस्ततःस्त्रियां टाप् । ) हननेच्छा । इति व्याकरणम् ॥ ( यथा, मनुः । ११ । २०६ ।
"जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥")

जिघांसुः, पुं, ( हन्तुमिच्छुः । हन् + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः । ) शत्रुः । इति हेमचन्द्रः । ३ । ३६३ । हननेच्छौ, त्रि । यथा, भट्टिः ।
"प्रशान्तवैरं हरिणं जिघांसुः ॥"
( यथाच, महाभारते । ३ । १५४ । १८ ।
"जिघांसवः क्रोधवशाः सुभीमा
भीमं समन्तात् परिवव्रुरुग्राः ॥" )

जिघ्रः, त्रि, ( जिघ्रतीति । घ्रा गन्धोपादाने + "पाघ्राध्माधेट्दृशः शः ।" ३ । १ । १३७ । इति शः । ) घ्राणकर्त्ता । यथा, साहित्यदर्पणे ।
"स्वामी निश्वसितेऽप्यसूयति मनोजिघ्रः
सपत्नीजनः ॥"

जिङ्गिनी, स्त्री, वृक्षविशेषः । तत्पर्य्यायः । झिङ्गिनी २ झिङ्गी ३ सुनिर्यासा ४ प्रमोदिनी ५ । ( यथा, गारुडे १६४ अध्याये ।
"जिङ्गिन्येरण्डकं रुद्र ! शूकशिम्बीसमन्वितम् ।
शीतोदकञ्च तन्नस्यो वाहुशोषापहं हरेत् ॥"
यथाच, वाभटे सूत्रस्थाने १५ अध्याये ॥
"रोध्रशावरकरोध्रपलाशा
जिङ्गिनी सरलकट्फलयुक्ताः ।
कुत्सिताम्बकदली गतशोकाः
सैलवालुपरिपेलवमोचाः ॥" )
अस्या गुणाः । मधुरत्वम् । उष्णत्वम् । कषायत्वम् । योनिशोधनत्वम् । कटुत्वम् । व्रणहृद्रोगवातातीसारनाशित्वम् । पटुत्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे १ मे भागे ॥

जिङ्गी, स्त्री, मञ्जिष्ठा । इत्यमरः । २ । ४ । ६० ॥ ( यथा, भैषज्यरत्नावल्यां कुष्ठचिकित्सायाम् ।
"वासु जिङ्गी महातिक्ता विशाला कपिपत्रकम् ॥")

जिज्ञासा, स्त्री, ( ज्ञातुमिच्छा । ज्ञा + सन् + अः । स्त्रियां टाप् ।) ज्ञातुमिच्छा । यथा,—
"अथातो ब्रह्मजिज्ञासा ।"
इति शारीरकप्रथमसूत्रम् ॥
तत्पर्य्यायः । अनुयोगः १ प्रश्नः २ पृच्छा ३ निरूपणा ४ । इति जटाधरः ॥

जिज्ञासितः, त्रि, ( जिज्ञासास्य जाता । तारकादित्वात् इतच् । यद्वा ज्ञा + सन् + कर्म्मणि क्तः । ) कृतजिज्ञासः । पृष्टः । विचारितः । यथा, श्रीभागवते १ । ५ । ४ ।
"जिज्ञासितमधीतञ्च ब्रह्म यत्तत् सनातनम् ॥"
"किञ्च यत् सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तञ्चेत्यर्थः ।" इति श्रीधरस्वामी ॥

जिज्ञासुः, त्रि, (ज्ञातुमिच्छुः । ज्ञा + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः । ) आत्मज्ञानेच्छुः । यथा, श्रीभगवद्गीतायां ७।१५ ॥
"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुन ! ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥"
सामान्यबोधेच्छुकश्च ॥

जिज्ञास्यः, त्रि, ( जिज्ञास्यते इति । ज्ञा + सन् + कर्म्मणि यत् । ) जिज्ञासितव्यः । जिज्ञासनीयः । ( विचार्य्यम् । यथा, भागवते । २ । ९ । ३५ ।
"एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥"
"आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्य्यम् ॥" इति श्रीधरस्वामी ॥ )

जितः, पुं, ( जितं जयमस्यास्तीति । अच् । ) अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

जितः, त्रि, ( जि + कर्म्मणि क्तः । ) प्राप्तपराजयः । तत्पर्य्यायः । पराभूतः २ परिभूतः ३ अभिभूतः ४ भग्नः ५ पराजितः ६ । इति हेमचन्द्रः ॥ ( यथा, मनुः । ४ । १८१ ।
"एभिर्जितैश्च जयति सर्व्वान् लोकानिमान् गृही ॥")

जितकाशिः, पुं, (जितेन जयोद्यमेन काशते प्रकाशते इति । काश + इन् । ) दृढमुष्टिः । इति भारतटीकायां नीलकण्ठः ॥

जितकाशी [न्] त्रि, ( जितेन जयेन काशते इति । काश + णिनिः । ) जययुक्तः । तत्पर्य्यायः । जिताहवः २ । इति हेमचन्द्रः । ३ । ४७० ॥ ( यथा, हरिवंशे । १७५।१४१ ।
"अनिरुद्धं रणे वाणो जितकाशी महाबलैः ।
वाचं प्रोवाच संक्रुद्धो गृह्यतां हन्यतामिति ॥")

जितनेमिः, पुं, ( जिता नेमिर्य्येन । ) अश्वत्थनिर्म्मितदण्डः । तत्पर्य्यायः । आश्वत्थः २ । इति हेमचन्द्रः । ३ । ४८० ॥

जितशत्रुः, पुं, ( जितः शत्रुर्येन । ) वृत्ताहर्त्पिता । इति हेमचन्द्रः । १ । ३६ ॥ कृतशत्रुपराजये, त्रि ॥

जिताक्षरः, त्रि, ( जितानि आयत्तीकृतानि अक्षराणि येन ।) कृताक्षरजयः । वशीभूताक्षरकः । दृष्टिमात्रेणाक्षरबोधेन पाठक्षमः । इति लोकप्रसिद्धिः ॥

जितामित्रः, पुं, ( जिता अमित्रा रागद्वेषादयो वाह्यावरणादयश्च येन इति । ) विष्णुः । इति शब्दरत्नावली ॥ ( यथा, महाभारते । १३ । १४९ । ६९ ।
"अजो महार्हः स्वाभाव्यो जितामित्रः
प्रमोदनः ॥"
जितोऽमित्रः शत्रुर्येन ।) कृतशत्रुपराजये, त्रि ॥ ( यथा, मार्कण्डेये । ३४ । ११३ ।
"ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ।
जितामित्रो नृपो यत्र बलवान् धर्म्मतत्परः ॥")

जितारिः, पुं, (जिता अरयः कामक्रोधादयो येन ।) बुद्धः । इति त्रिकाण्डशेषः ॥ वृत्ताहर्त्पिता । इति हेमचन्द्रः । १ । ३६ ॥ ( कुरुपुत्त्रस्याविक्षितः पुत्त्राणामन्यतमः । यथा, महाभारते । १ । ९४ । ५० ।
"अविक्षितः परिक्षिच्च शवलाश्वश्च वीर्य्यवान् ।
आदिराजो विराजश्च शाल्मलिश्च महाबलः ।
उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः स्मृतः ॥")
जितशत्रौ, त्रि ॥

जिताष्टमी, स्त्री, (जिता पुत्त्रसौभाग्यदानेन सर्व्वोत्कर्षेण स्थिता या अष्टमी । ) गौणाश्विनकृष्णाष्टमी । सैव जीमूताष्टमी । यथा, "आश्विनकृष्णाष्टम्यां जीमूतवाहनपूजा । तत्राष्टमी प्रदोषव्यापिनी ग्राह्या । भविष्योत्तरे ।
"इषे मास्यसिते पक्षे अष्टमी या तिथिर्भवेत् ।
पुत्त्रसौभाग्यदा स्त्रीणां ख्याता सा जीवपुत्त्रिका ॥
शालिवाहनराजस्य पुत्त्रो जीमूतवाहनः ।